# Gangashtakam 10

# गङ्गाष्टकम् १०

## Document Information

Text title : Gangashtakam 10

File name : gangAShTakam10.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Author : Ravindra Kumar Siddhanta Shastri

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

Gangashtakam 10

# गङ्गाष्टकम् १०

श्रीगणेशाय नमः ।
गिरिराजसुतां वितुलां विततां त्रिदशैर्महितां वियतः पतिताम् ।
कलुषै रहितां नरदेवहितां प्रणमामि सितां वहुसत्त्वयुताम् ॥ १॥

अतिपूतगतामृषिराजनतां भुवनप्रथितामभिजातचिताम् ।
मुनिमानिनुतां मनुजैरमितां प्रणमामि सितां मुनिवक्रमिताम् ॥ २॥

शिवशीर्षगतां कलनादयुतां भुजगेन नुतामजविष्णुहिताम् ।
अविगीतमतां कृतसिन्धुरतां प्रणमाम्यमृतां हरिपादमृताम् ॥ ३॥

जननीविनतां सुरहस्तिगतां दनुजैरजितां तपसा विजिताम् ।
जलदानरतां दयया विदितां प्रणमाम्यमृतां बहुभाग्ययुताम् ॥ ४॥

श्रुतिसारमितां स्मृतिषु प्रथितां कलिदोषकृतां शरणं प्रचिताम् ।
घृतदेवहुतां गुणिभिः प्रणतां प्रणमाम्यमृतां बहुभाग्ययुताम् ॥ ५॥

जनताकुलितां बहुधा ललितां कृतरम्यरुतां शमनादिनुताम् ।
नरलोकगतां परमार्थयुतां प्रणमाम्यमृतामपराधिहिताम् ॥ ६॥

बहुवेणियुतां जलजानहतां यतिभिर्मिलितामधिकाशि शिताम् ।
स्फटिकोपमितां स्तुतिगीतिमतां प्रणमाम्यजितामधिराजनताम् ॥ ७॥

सकलासुहितां सततावहितां कुणपैः पिहितां चिकुरावचिताम् ।
विहगध्वनितां विधिपात्रमतां प्रणमाम्यजितां श्रुतिसंप्रथिताम् ॥ ८॥

इति रवीन्द्रकुमार सिद्धान्तशास्त्रि कृतं गङ्गाष्टकं सम्पूर्णम् ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Gangashtakam 10*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*